PAPER - 4

# MT

2017 .... .... 1100 Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - IV**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

---

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १
यात्री सदाचरणविषये चिन्तयति, यतः.......
(पापस्य भारः नद्यै दातव्यः। / पुण्यस्य सञ्चयः करणीयः।)

(ii) कः कं वदति। १
''अस्य पापस्य किं करोषीति?''

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १
मेघः पापं नद्यै यच्छति।

तदा तद् ज्ञातुमुत्सुकोऽसौ यात्री सागरतीरं गतवान् तत्र च सागरं पृष्टवान्, रे सागर, सर्वाः नद्यः स्वजलस्थितं पापं त्वयि निक्षिपन्ति । तेन त्वं पापाकरः वा पापधिरेव भवसि न वेति। सागर उक्तवान्, न हि, यदा नद्यः पापमानयन्ति तदहं गृह्णामीति सत्यम् । किन्तु सूर्यकिरणैः तस्य जलस्य बाष्पं भवति । बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने इति । तच्छ्रुत्वा अतीवोत्कण्ठितः स सागरतीरे स्थित्वैव अवलोकयितुमारब्धवान् । तेन दृष्टं तस्य बाष्पस्यैव मेघो भवति । अतः स यात्री मेघं पृष्टवान्, रे मेघ, अस्य पापस्य किं करोषीति? मेघः भणितवान्, न किमपि करोमि। अहं तु जीवनदाता । जीवनं स्वकर्माधिष्ठितम् । अतः यस्य यत्पापमस्ति तत्तस्य गृहशिखरे वृष्टिरूपेण पातयामीति। एतन्निशम्य यात्री मनस्यकरोत् यद् उचितप्रायश्चित्तं विना पापान्मुक्तिरशक्या । अतः सत्कर्मानुसरणमेव सर्वथा श्रेयस्करमिति ज्ञातमधुना मया ! जीवने सदाचारी भूत्वैव पुण्यसञ्चयं करिष्ये । पापाचरणं कृत्वा तस्य भारं न कस्मा अपि दास्ये इति विचिन्त्य प्रशान्तमनसा स स्वगृहमगच्छत् ।

**२. स्वमतप्रकटनम् ।** २
'पुण्यसञ्चयः कथं भवति' इति माध्यमभाषया लिखत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १
खिस्त - दि - रिडिमर इति पुत्तलः ............... स्थितः । तथा इति सप्ताश्चर्येषु ............ आश्चर्यम् वर्तते । (सुमार्गमध्ये / पर्वते) (पञ्चमम् / षष्ठम्)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

आश्चर्यगणेषु सप्तमम् आश्चर्यं कुत्र वर्तते ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

ताजमहालस्य शोभा अमावस्यायाः रात्रौ वर्धते ।

एतदभिमानास्पदं यद् चतुर्थाश्चर्यं भारतभूमावेव स्थितम् । शाहजहानसम्राजा स्वपत्नीस्मरणार्थं विनिर्मितमेतत् शिल्पं भारतीयस्थापत्यकलायाः अनुपमेयं प्रतीकम् । पौर्णिमायां रात्रौ चन्द्रज्योत्स्नाधवलितस्यैतस्य ताजमहालस्य शोभा अवर्णनीया केवलं स्वसंवेद्या च । पञ्चममाश्चर्यं नाम ब्राझिलदेशे 'रिओ-डि-जानिरोनगरसमीपे पर्वतस्थः ख्रिस्त-दि-रिडिमर' इति पुत्तलः। रिडिमर नाम तारकः एषः क्रुसाकारे विराजते । मेक्सिकोदेशे विराजमाना 'मायासंस्कृतेः प्रतीकरूपा 'चिचेन् इट्झा' नाम पुरातनी नगरी विश्वस्य षष्ठाश्चर्यम्। अपि ज्ञायते त्वया यद् मायासंस्कृतिरतिप्राचीना विकसिता चासीत् । जार्डनदेशस्था प्राचीना नगरी पेट्रा आश्चर्यगणेषु सप्तमा । रक्तसमुद्रमृतसमुद्रयोः मध्यप्रदेशे विकसितैषा नगरी महत्त्वपूर्णं व्यापारकेन्द्रमासीत् । वस्तुतः एकैकमाश्चर्यमनुसृत्य अन्तर्जालतोऽनल्पं ज्ञातव्यमस्ति, किन्तु अद्याहं बहुकार्यव्यापृता। अतः अन्तर्जालतः यद्यधिकं ज्ञातव्यं स्यात्तर्हि एतानि सङ्केतस्थलानि निर्दिशामि - यथा www.wikipedia.com/www.answer.com. आदीनि । तव प्रकल्पार्थं शुभाशंसाः । अधुना एतदेवालम् । अत्र विरमामि । शुभदिनम् ।

२. **पृथक्करणम् ।** २




**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) चतुर्थपदं लिखत । १

१) दीर्घः : ह्रस्वः :: लघुः : ................ ।

२) निभृतः : स्थिरः :: अरण्यम् : ................ ।

(ii) मेलनं कुरुत । (विशेषण-विशेष्य) १

| | |
|---|---|
| १) असमर्थाः | जन्तवः |
| २) क्षुद्राः | समयः |
| ३) शस्त्रहीनः | गुप्तचराः |
| ४) अतीतः | अर्जुनः |

(iii) गद्यांशे आगते द्वे ल्यबन्त-अव्यये लिखत । १

दीर्घसमयोऽतीतः । अज्ञातवासकाले शस्त्रहीनः परिव्राजकवेषधारी अर्जुनः पुनरेकवारं तमेव वनप्रदेशं प्राविशत् । निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव श्रुतिपथमागतः। कांश्चन गुप्तचरान् तं प्रति एवागच्छतः सः दृष्टवान् । सः व्यचिन्तयत्, ''अज्ञातवासकाले यदि कोऽपि मामभिजानीयात् तर्हि महापत्तिः उद्भवेत् । किं करणीयमधुना ।'' इति चिन्तयतः तस्य पुरतः सूर्यखगः तत्रोपस्थितः । तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि विशालवृक्षस्य समीपं नीतः । वृक्षे महान् कोटरः आसीत् । कोटरं प्रविश्य अर्जुनः तत्रैव निभृतः स्थितः। तस्मिन् कोटरे स्थिते पिपीलिकाभिस्तस्य सर्वाङ्गं तथा आच्छादितं यथा अदृश्यः इवाभवत् । अर्जुनमन्विष्यन्तः तत्रागताः ते गुप्तचराः तं ज्ञातुमसमर्थाः ततः प्रतिनिवृत्ताः । एवं सङ्कटमुक्तोऽर्जुनः सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं तान् प्रति कृतज्ञतां प्रकटितवान् ।

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) पिपीलिकानां सहाय्यम् ।

(ii) सूर्यखगस्य दिशादर्शनम् ।

(iii) गुप्तचराणाम् आगमनम् ।

(iv) अर्जुनस्य चिन्तनम् ।

**द्वितीयः विभागः - पद्यम् ।**

**प्र.२ अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च ।
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् ।।१।।
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च शीलमेतत्प्रशस्यते ।।२।।

१. **शब्दज्ञानम् ।**

चतुर्थपदं लिखत । १

१) मनः : चित्तम् :: वाणी : ............ ।

२) अनुग्रह : कृपा :: चारित्र्यम् : ............. ।

२. **पृथक्करणम् ।** दन्तघर्षणविधिः २




**प्र.२ ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

यत्रोत्साहसमारम्भो यत्रालस्यविहीनता ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ।।१।।
समीपमाराधनमन्दिरं च सेन्ट्-चेपलं विश्रुतमस्ति नाम ।
मूर्ध्नोऽस्य तीक्ष्णस्तनुरग्रभागो नभस्थितं दर्शयतीव देवम् ।।२।।

१. **अवबोधनम् ।**
पूर्णवाक्येन उत्तरत । १
न्यायप्रासादस्य समीपं किम् आराधनमन्दिरं विश्रुतमस्ति ?

२. **तात्पर्यलेखनम् ।** २
प्रथमश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् । (केवलं १ श्लोकः लेखनीयः ।)** २
**सुभाषितं शुद्धं पूर्णं च लिखत ।**

(i) अत्यम्बुपानान्न ....... पिबेदभूरि ।।
(ii) गुणी ....... मूषकः ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | याममध्ये न भोक्तव्यं | १) धेनुपन्नगयोरिव । |
| (ii) | पात्रापात्रविवेको हि | २) धृतमन्यैर्न धारयेत् । |
| (iii) | उपानहौ च वासश्च | ३) वासरान्ते पिबेत् पयः । |
| (iv) | भोजनान्ते पिबेत्तक्रं | ४) याममुग्मं न लङ्घयेत् । |
| | | ५) यामयुग्माद्बलक्षयः । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २
**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | षष्ठी एकवचन | प्रथमा बहुवचन | तृतीया एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(सर्वे, वयस्येन, वस्तुनः, अनुसारिणः, मम, त्वया)

आ) **क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | विध्यर्थः | वर्तमानकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(पिबेत्, वेत्ति, प्रार्थयामास, करिष्यामः, भव, अपतन्)

इ) **समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**विग्रहवाक्यानां समासनामभिः सह मेलनं कुरुत ।**

| | विग्रहवाक्यानि | समासनामानि |
|---|---|---|
| (i) | प्रशान्तं मनः, तेन । | अव्ययीभावः |
| (ii) | आशङ्कया सह । | उपपद - तत्पुरुषः |
| (iii) | धेनुः च पन्नगः च तयोः । | नञ् - बहुव्रीहिः |
| (iv) | न वर्णनीया । | कर्मधारयः |
| (v) | साहाय्यं कुर्वन्ति इति । | इतरेतर - द्वन्द्वः |
| (vi) | निर्गतः आश्रयः येभ्यः ते । | नञ् - तत्पुरुषः |

ई) **उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) इदं गृहीत्वा ........ गच्छतम् । ( स्वगृहे / स्वगृहं / स्वगृहस्य )

(ii) अशीतिरूप्यकाणि ........ कृते । ( किलोपरिमितम् / किलोपरिमितस्य / किलोपरिमितेन )

(iii) जननी ........ स्निह्यति । (बालके / बालकम् / बालकाय)

(iv) ........ अधः पान्थः सुप्तः । (वृक्षम् / वृक्षात् / वृक्षस्य)

(v) धीराः ........ न विरमन्ति । (स्वकार्ये / स्वकार्यात् / स्वकार्येण)

(vi) चौरः धनिकस्य ........ प्रविशति । (गृहे / गृहात् / गृहम्)

उ) **सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) जनसमाकुलान्नगराद् = ....... + नगरात् ।

(ii) ....... = श्रीः + अचला ।

(iii) एतदेव = ....... + एव ।

(iv) तीक्ष्णस्तनुः = तीक्ष्णः + ....... ।

(v) भारतभूमावेव = भारतभूमौ + ....... ।

(vi) ....... = ग्राहकहिताय + एव ।

ऊ) **सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) महाराजः ....... युवानौ प्रेषितवान् । (2)

(ii) स्वातन्त्र्यपूर्वकालादेव क्रीडामेतां वैश्विकस्तरं नेतुं ....... प्रयासः कृतः महाराष्ट्रेणैव । (first)

(iii) क्रीडाङ्गणे तु ....... क्रीडापटवः एव खेलन्ति। (7)

(iv) ....... आश्चर्यं भारतभूमावेव स्थितम् । ($4^{th}$)

(v) सप्ताहस्य ....... अहं मन्दिरं गच्छामि ।(thrice)

(vi) मया ....... अपि तीर्थयात्रा न कृता । (once)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| ऋषयः | वृक्षशाखायाम् | पराजयन्ते |
| कौरवाः | आश्रमे | स्मः |
| मर्कटः | भारतीयाः | उपविशति |
| वयं सर्वे | युद्धे | वसन्ति |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

महाराष्ट्रराज्ये रायगडः नाम सुविख्यातः दुर्गः। एकदा हिरकणी दुग्धविक्रयार्थं रायदुर्गं गन्तुम् उत्सुका। किन्तु तस्याः शिशुः अद्यापि न सुप्तः। यदा दोलारूढः शिशुः सुप्तः तदा हिरकणी ....... प्रस्थिता। दुर्गे दुग्धविक्रयार्थं अधिकः कालक्षेपः अभवत्। सूर्ये अस्तमिते दुर्गद्वाराणि पिहितानि। आवृत्तं महाद्वारं ....... सा द्वारोद्घाटनाय रक्षापुरुषं प्रार्थयत परं सूर्योदयसमये एव द्वारम् उद्घाटनीयम् इति शिवभूपस्य आज्ञाम् अनुसृत्य सः तद् न उद्घाटितवान्। अस्वस्थचित्ता सा इतस्ततः अभ्रमत्। तस्याः नयनयोः पुरतः केवलं तस्याः शिशुः आसीत्। पुत्रस्नेहेन सा एकस्मात् तटात् अवतरणं प्रारभत सुदूरम् उत्प्लुत्य भूमौ न्यपतत् ....... च अगच्छत्। शिवभूपेन तस्या न केवलं प्रशंसा कृता ....... पारितोषिकमपि दत्तम्।

(गृहं, विलोक्य, दुर्गं, तस्यै)

**Best of Luck**